दिनांक 16-12-20 शास्त्री तृतीयवर्ष, विषय-व्याकरण।

प्रश्न - इकोयणचि अस्य सूत्रस्य मनोरमोक्त दिशा व्याख्या कार्या।

उत्तर - प्रत्याहारग्रहणेषु तद्वाच्यवाच्यानामपि भवत्यां ग्रहणात्। गृह्यन्ते वा ध्यते यैः तानि ग्रहणानि प्रत्याहारा एव ग्रहणानि प्रत्याहारग्रहणानि तेषु प्रत्याहारग्रहणेषु। पदवाच्या जातिर्व्यक्तिर्वा पदवाच्येति मतद्वयम्। तथाहि व्यक्तीनामानन्त्येन तत्र शक्तिकल्पने गौरवाल्लाघवादेकस्यां जातावेव तत् कल्पनम्। गामानयेत्यादौ व्यक्तिबोधस्तु लक्षणया। अतो नास्ति यथासंख्यम्। न च लक्षणायाः बोधात्पूर्वं भाविनं शास्त्रार्थबोधमादाय यथासंख्यमस्त्विति वाच्यम्। एवमपि तृतीयचतुर्थयोः प्रत्येकं त्रिंशदुपस्थितौ लृवर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसंगात्।

तस्मादिह स्थानेऽन्तरतमः सूत्रं वाशिष्टस्य हूर [blot] वर्णि प्रत्याह — स्थानत आन्तर्यमिति

ननु प्रथमान्तार्थनिष्ठविषयतानिरूपितविषयतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रत्युत्पादनमाणपदनिष्ठवृत्त्या आनायाभ्यां नोपस्थितः कारणत्वेन दीर्घादीनामिकपदनिष्ठवृत्त्याऽनुपस्थितत्वात् तेषामिकपदोत्तरषष्ठ्यर्थेनान्वयाभावे दीर्घेषु यणोऽसिद्धया त्वादिष्वाः इति निर्देशोऽनुपपन्नः।

ननु भावत् पर्यन्तं लक्षणा न प्रमाणसिद्धा। तावद् भाष्येण ऽव्याख्यानां ग्रहणस्य तु शक्यसम्बन्धत्वाभावेन सिद्धिरिति चेन्न।

उत्तरम् आभपूर्वः इति सूत्रेऽनुवर्तिष्यमाणाणुपदस्य अनादि सम्बन्धं कृत्वा तेनान्वितेन प्रत्याहारावर्णेन ग्राहकशास्त्रे न तादीर्घाकारस्यापि बोधसंभवत्वात्। वस्तुतस्तु आदित्वस्य प्रथमान्तं स्वीकृतं इत्यवटे आद्गुणः सवर्णदीर्घान् इति व्याख्याने नाऽदोषः। यद्वा अश्च आश्च अणौ समाहारे अण् स्मात् अत् इति व्युत्पत्त्या अपदेन ह्रस्वाकारदीर्घाकारयोर्बोधात् दोष इति। तत्र लक्षणासिद्धेः प्राग् ह्रस्वाकारदीर्घाकारयोः सवर्णदीर्घः सौ वा लभ्य दुष्करमपि सिद्धिः। प्रत्याहार[struck] स्ववर्णेन दीर्घादीनामपि ग्रहणमित्यत्र संक्षेप लघोत्तरम् इति।

अमरनाथ मिश्र
एसो. प्रो० व्याकरण
सुलसेवा पूर्णिमा

दिनांक 11-12-20

उपशास्त्री द्वितीयवर्ष, विषय-व्याकरण।
ग्रन्थ-सिद्धान्तकौमुदी, तनादिगणः

1 सनुते - षणु धातोः धात्वादेः षः सः इति सूत्रेण सत्वे। तिप्तस्झि इति सूत्रेण त प्रत्यये, सार्वधातुकसंज्ञायाम्, शप्प्राप्ते तनादिकृञ्भ्य उः इति सूत्रेण उ प्रत्यये। ङित्वात् गुणनिषेधे। टित आत्मनेपदानां टेरे इति एत्वे कृते सनुते इति सिद्धम्।

2 सायात् - षणु धातोः धात्वादेः षः सः इति सूत्रेण सत्वे। ~~मि इति सूत्र~~णाशीर्लिङि यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुट् आगमे, लिङः सलोपोऽनन्त्यस्य इति सलोपे, ये विभाषा इति नकारस्य स्थाने वा आत्वे सायात् इति सिद्धम्, आत्वाभावे सन्यात् इति रूपं भवति।

3 असात् - षणु धातोः लङि, धात्वादेः षः सः इति सत्वे, सार्वधातुकसंज्ञायाम्, शप्प्राप्ते जनसनखनां सञ्झलोः इति सूत्रेण नकारस्य स्थाने आत्वे, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे अनुबन्धलोपे असात् इति सिद्धम्।

4 करोति - कृञ् धातोः लटि लटः स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। सार्वधातुकसंज्ञायां शप्प्राप्ते तनादिकृञ्भ्य उः इति सूत्रेण उ प्रत्यये सार्वधातुकत्वात् गुणे रपरे कृते करोति इति सिद्धम्।

5 कुरुतः - कृ धातोः लटि, लटः स्थाने तिप्तस्झि इति सूत्रेण तस् प्रत्यये। सार्वधातुकसंज्ञायां शप्प्राप्ते तनादिकृञ्भ्य उः इति सूत्रेण उ प्रत्यये, ~~सार्व~~ तपरकरणत्वात् गुणे ~~रपरे, अत उत्~~ ~~सार्वधातुकमपित् इति प्रत्ययेङित्वात् निषेधे।~~ ~~अत उत् सार्वधातुके इति सूत्रेण उत्वे सकारस्य रुत्वे विसर्गे कुरुतः इति सिद्धम्~~ रपरे, अत उत् सार्वधातुके इति सूत्रेण उत्वे कुरुतस् इति दशायां सकारस्य रुत्वे विसर्गे कुरुतः इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म०वि०
रुखमेना प्रार्थीमा